NAME OF TEACHER: MOUMITA SARKAR.

आधुनिकसंस्कृतसाहित्ये श्रीजीवन्यायतीर्थः(SEM-IV, SUB-SANA,PAPER-CC9,SEC-A)

भारतबर्षस्य संस्कृतसाहित्यसाधनायां वङ्गीयानाम् अवदानम् अनस्वीकार्यम्।संस्कृतसाहित्यस्य विविधासु शाखासु वङ्गीयप्रतिभायाः गौरवमयी क्रियाशीलता अतीतकालादारभ्य इदानीन्तनं यावद् अम्लालेन एव अवतिष्टते।तेषु वङ्गीयकविषु श्रीजीवन्यायतीर्थः अन्यतमः।तस्य सारस्वतसाधनया अर्वाचीनसंस्कृतसाहित्यम् उद्भासितम्।

जन्म :-संस्कृतसाहित्यगगने नक्षत्रमिव भाति पण्डिताग्रगण्यस्य पञ्चाननतर्करत्नस्य आत्मजः श्रीजीवन्यायतीर्थः।1893 ईशवीयाब्दे जानुयारीमासस्य षडविंशतितमे दिवसे स पश्चिमवङ्गस्य उत्तरचव्विशपरगणाजेलायां भाटपाडास्थाने अजायत।

शिक्षाजीवनम्-पितृदेवस्य चतुष्पाठ्यां प्राथमिकशिक्षान्ते सः कलिकातायाः संस्कृतकलेजियेट-विद्यालयात् प्रवेशिकापरीक्षायाम् उत्तीर्णम् अभवत्।पश्चात् सुरेन्द्रनाथमहाविद्यालयात् वि.ए परीक्षायाम् उत्तीर्ण्य कलिकताविश्वविद्यालयात् एम.ए डिग्रीं लब्धवान्।पिता पञ्चाननतर्करत्नः वाराणस्याम् आधुनिकन्यायशास्त्रयोरध्ययनार्थं महामहोपाध्यायं राखालदासन्यायरत्नं निकषा प्रेषितवान्।पण्डितहरप्रसादशास्त्रीणां मार्गनिर्देशेन तेन "आधुनिकतर्कविज्ञानस्य क्रमविवर्तनम्"(EVOLUTION OF MODERN LOGIC) इति शोधवन्धं विरच्य "डक्टरेट" उपाधिं अधिगतम्।

कर्मजीवनम्- अध्यनादनन्तरं स आदौ एव पितृदेवस्य चतुष्पाठ्याम् अध्यक्षत्वेन,ततः ऋषिवङ्किमचन्द्रमहाविद्यालयस्य अध्यापकरूपेण विराजते स्म।पश्चात् कलिकताविश्वविद्यालयस्य संस्कृतविभागे, अन्तिमे च यादवपुरविश्वविद्यालयस्य संस्कृतविभागे अध्यापकपदम् अलंकृतवान्।काव्यतीर्थ-व्याकरणतीर्थन्यायतीर्थाद्युपादिभिःसम्मानितः सःकलिकाताबर्धमानविश्वविद्यालयाभ्यां डि.लिट् इत्युपाधिना भूषितः।विविधैः पुरस्कारैः श्रीजीवः सम्मानितो अभवत्।तद् यथा- 1968 ईशवीयाब्दे भारतसर्वकाराद्राष्ट्रपतिसम्मानं, प्रयागविद्वद्समाजपक्षतो "भारतशिरोमणि",हावडापण्डितसमाजादेव "व्याकरणशिरोमणि:", विश्वभारतीविश्वविद्यालयेन "देशिकोत्तम" उपाधिना स तु सत्कृतः।

काव्यप्रतिभायाः निदर्शनम्-तस्य सारस्वतविद्याधारा तु षष्टिः वर्षाणि यावत् प्रवाहिता निरवच्छिन्नरूपेण।तेन महाकाव्य-चित्रकाव्य-गीतिकाव्य-नाटक प्रभृतीनि रचितानि।तस्य श्रव्यकाव्यानि रूपकानि विशेषेण प्रहसनानि साहित्यकीर्तेःमानदण्डान् स्थापयन्ति।तत्प्रणीतानां मौलिकग्रन्थानां सूची प्रदीयते-

श्रव्यकाव्यानि-

1. पाण्डवविक्रमम्(महाकाव्यम्)
2. सारस्वतशतकम्(चित्रकाव्यम्)
3. ऋतुचक्रचंक्रमणम्(गीतिकाव्यम्)

दृश्यकाव्यानि- एकोनत्रिंशतः दृश्यकाव्यानि तेन विरचतानि।तेषु उल्लेखयोग्यानि-

(क)नाटकानि-

1. महाकविकालिदासम्
2. साम्यसागरकल्लोलम्
3. श्रीशङ्कराचार्यम्
4. विवेकानन्दचरितम्
5. सिन्धुसौवीरसंग्रामम्
6. श्रीकृष्णकौतुकम्
7. रघुवंशम् प्रभृतिः।

(ख)प्रकरणम्-

1. माधुरीसुन्दरम्।

(ग)भाणद्वयम्

1. विधिविपर्यासम्
2. पुरूषपुङ्गवः।

(घ)व्यायोगाः-

1. कैलासनाथविजयम्
2. गिरिधरसम्बर्द्धनम्।

(ङ)प्रहसनानि-

1. विवाहविडम्वनम्
2. चिपिटकचर्वणम्
3. वनभोजनम्
4. द्ररिद्रदुर्दैवम्
5. चौरचातुरीयम्। प्रभृतिः।

परिशेषे एतद् वक्तव्यं यत्, संस्कृतसाहित्यस्य चिराचरितं धारामतिक्रम्य वर्तमानजीवनम् अवलम्व्य श्रीजीवन्यायतीर्थस्य ग्रन्थाः पाठकसमाजे सर्वोच्चस्थानमधिकुर्वन्ते।